


श्रीमते पराङ्कुशार्यमहादेशिकाय नमः । ऋचः सामानि यजूꣳषि । सा हि श्रीरमृता सताम् ।

**पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)**

pivstrust.org ✉: pivstrust@gmail.com


# तैत्तिरीये अश्वप्रतिग्रहेष्टिः

க்ரோதிவருடம் (2024) ஸ்வாமி ஶ்ரீதேசிகனின் அவதாரஉத்ஸவத்தில் 6-10-2024 அன்று தூப்புல் வேத ஸதஸ்ஸில் ப்ரஸ்தாவிக்கப்பட்டது.


சோகத்தூர் ராமாநுஜாச்சாரியார் மற்றும் சிவி. விஷ்ணுவர்த்தன்

वेदवारिधिः प. रामानुजाचार्यः



**PARANKUSHACHAR INSTITUTE OF VEDIC STUDIES (Regd.), Bengaluru**

# तैत्तिरीये अश्वप्रतिग्रहेष्टिः

(वेदाध्ययनकाले साकमेव मन्त्राणाम् अर्थज्ञानविषयेऽपि रुचिवर्धनाय प्रयुक्तक्रमे अस्माभिः ईदृशाः विषयाः प्रस्तूयन्ते ।)

पुरुषार्थसाधनत्वेन यज्ञान् निर्दिशन्ति श्रुतयः । तैत्तिरीयसंहितायां द्वितीयकाण्डे द्वितीयतृतीय-चतुर्थप्रश्नेषु काम्येष्टयः श्रुताः । तेषु **अश्वप्रतिग्रहेष्टिर्नाम** काचित् वैदिकाश्वदानप्रायश्चित्तत्वेन विहिता सोपाख्यानं विवृता च । दशविधब्राह्मणवाक्यप्रकारेष्वन्यतमायाः परकृतेः, **व्यवधारण-कल्पनायाश्च** दृष्टान्तत्वेन पूर्वमीमांसाशास्त्रे प्रतिपादिता ।

(तै.सं. २का.-३प्र.-१२) अनुवाकः एतद्विषयकः पूर्वं पठ्यते । ततः तत्रत्यावान्तरवाक्यानां प्रस्तावनया तेषाम् अन्वयक्रमेण अर्थजिज्ञासायां विचाराः भट्टभास्करभाष्य, सायणभाष्य, तदनुवादेभ्यः, तद्विषयकस्य पूर्वमीमांसायाः (३अ.-४पा.-१५अधि.) गत-सूत्रद्वयस्य शाबरभाष्य-भाट्टदीपिका-शास्त्रदीपिका-सेश्वरमीमांसादिभ्यः सङ्गृह्य प्रस्तूयन्ते । भट्टभास्करः शाखान्तरीय (मैत्रायणीय) पाठानुसारं केचन प्रतिग्रहीतुरिष्टिरित्यभिप्रयन्तीत्युक्त्वा तैत्तिरीये तदनादर्तव्यमित्याह ॥ अत्रत्यस्य आर्च्छत् इतिपदस्य पाश्चात्यः कश्चित् नूतनमर्थं विवृत्य सायणाद्युक्तं दोषयुक्तं मनुते, न्यायाद्यपेतत्वात् तदुपेक्ष्यम् इत्यास्तामेतत् ॥

वेदवारिधिः प. रामानुजाचार्यः

# विचारविषयभूतानुवाकः तै.सं. 2.3.12

प्र॒जाप॑ति॒र्वरु॑णा॒याश्व॑मनयत्, सः स्वान्दे॒वता॑मार्च्छत्, सः पर्य॑दीर्यत,

स ए॒तँव्वा॑रु॒णञ्चतु॑ष्कपालमपश्य॒त्, तं निर॑वपत्, ततो॒ वै स व॑रुणपा॒शाद॑मुच्यत ।

वरु॑णो॒ वा ए॒तङ्गृ॑ह्णाति॒ योऽश्व॑म्प्रतिगृ॒ह्णाति॑

याव॒तोऽश्वा᳚न्प्रतिगृह्णी॒यात्ताव॑तो वारु॒णाञ्चतु॑ष्कपाला॒न्निर्व॑पेत्

वरु॑णमे॒व स्वेन॑ भाग॒धेये॒नोप॑ धावति स ए॒वैनँ॑व्वरुणपा॒शान्मु॑ञ्चति

चतु॑ष्कपाला भवन्ति॒ चतु॑ष्पा॒द्ध्यश्व॒स्समृ॑द्ध्यै

एक॒मति॑रिक्त॒न्निर्व॑पे॒त् यमे॒व प्र॑तिग्रा॒ही भव॑ति॒ यँव्वा॒ नाध्येति॑ तस्मा॑दे॒व व॑रुणपा॒शान्मु॑च्यते

यद्यप॑रम्प्रतिग्रा॒ही स्यात्सौ॒र्यमेक॑कपाल॒मनु॒निर्व॑पेत् अ॒मुमे॒वादि॒त्यमु॑च्चा॒रङ्कु॑रुते

अ॒पो॑ऽवभृ॒थमवै᳚त्य॒प्सु वै वरु॑णस्सा॒क्षादे॒व वरु॑ण॒मव॑ यजते

अ॒पो॒न॒प्त्रीय॑ञ्च॒रुम्पु॒नरे॒त्य॒ निर्व॑पेत्

अ॒प्सुयो॑नि॒र्वा अश्व॑ः, स्वामे॒वैन॒ँय्योनि॑ङ्गमयति स ए॑नꣳ शा॒न्त उप॑ तिष्ठते ॥

वेदवारिधिः प. रामानुजाचार्यः

## ஶ்ரௌதம் (श्रौतम्) புத்தகத்தில் - வி.கே. ராமானுஜாசாரியார்.

## விகிருதியான இஷ்டிகள்

अश्वप्रतिग्रहेष्टि - இதற்கு தேவதை வருணன். திரவியம் நாலுகபால-புரோடாசம். प्रजापति வருணனுக்கு ஒரு குதிரையைக் கொடுத்தார். அவருக்கு மஹோதரம் என்கிற வியாதி வந்தது. அவர் இந்த இஷ்டியை இதற்கு மருந்து என்று அறிந்து, அதைச் செய்தார். வியாதி போய்விட்டது. இந்தக் கதையைச் சொல்லி எவன் குதிரையை வாங்கிக் கொள்ளுகிறானோ (प्रतिगृह्णाति) அவனை வருணன் பிடித்துக் கொள்ளுகிறான் என்று காட்டி, குதிரை எத்தனையோ, அத்தனை யாகங்களைச் செய்யவேண்டியது என்று வேதம் விதிக்கிறது. (தை. ஸம். கா-2, பிர-3, அநு-12, ப-46).

இந்த இஷ்டியை எவன் செய்ய வேண்டியது - குதிரையைக் கொடுக்கிறவனா - வாங்கிக் கொள்ளுகிறவனா என்று சந்தேகம். प्रतिगृह्णाति - என்கிற சொல்லுக்கு வாங்கிக்கொள்ளுகிறானென்று பொருள். ஆனால் கொடுத்த प्रजापतिக்கு தொந்தரவு வந்ததாக கதை சொல்லுகிறது. ஆகையால் இந்தச் சொல்லுக்கு வாங்கும்படி செய்கிறது - அதாவது கொடுப்பது என்று பொருள் கொண்டு, குதிரையைக் கொடுக்கிறவன் தான் இஷ்டியைச் செய்ய வேணுமென்று தீர்மானம் (பூர்வமீமாம்ஸை அத்தி-3, பா-4, அதி-15).

जैमिनीयन्यायमालायाम्

यावतः प्रतिगृह्णीयादश्वांस्तावत्य इष्टयः । प्रतिग्रहीतुर्दातुर्वा स्यादाद्योऽस्तु यथाविधि ॥
असंजातविरोध्यर्थवादाद्दातुः प्रजापतेः । इष्टिः श्रुतां ततो दातुर्णिजर्थेऽपि विधिं नयेत् ॥

वेदवारिधिः प. रामानुजाचार्यः

# सायणभाष्यम्

अथ द्वादशेऽश्वदानवत इष्टिं विधास्यन्प्रस्तौति प्रजापतिरिति । अनयद्दत्तवान् । देवस्य भावो देवता । स प्रजापतिः स्वकीयं देवत्वमार्छ्छदार्तमकरोत् । 'प्राजापत्यो वा अश्व' इति श्रुतेः प्रजाप्रतिरेव पूर्वमश्वस्य देवता । तस्मिन्नश्वे वरुणाय दत्ते सति स्वकीयमश्वस्वामित्वम् अपगतं तन्निमित्तेन दुःखेन स प्रजापतिः पर्यदीर्यत तदीयं परितो दीर्णं दीर्घरोगग्रस्तमभूत् । स च रोगो वरुणपाशरूपत्वाद्वारुणेष्ट्या निवृत्तः । इदानीमिष्टिं विधत्ते – 'वरुणो वा' इति । 'प्रतिगृह्णाती'त्यस्यान्तर्भावितण्यर्थत्वा'त्प्रतिग्राहयति' 'ददाती'त्ययमर्थः संपद्यते । कपालसंख्यां प्रशंसति चतुष्कपाला इति । अश्वसंख्यातोधिऽकं पुरोडाशं विधत्ते एकमतिरिक्तमिति । यमेवाश्वमित ऊर्ध्वं यदा कदाचित्कालान्तरे प्रतिग्रहीष्यति दास्यति, अथवा यं कंचिदश्वं प्रतिगृहीतं नाध्येति विस्मरति तदर्थोऽयमतिरिक्तः पुरोडाशः । निमित्तविशेषेणाङ्गाधिक्यं विधत्ते - यद्यपरमिति । कांश्चिदश्वान्दत्वा तदानीमेवेष्ट्यनुष्ठाने सत्येकेनातिरिक्तेन सहितास्तावन्तः पुरोडाशाः पर्याप्ताः । यदा तु दानानन्तरमेवेष्टिर्नानुष्ठिता किंतु कंचित्कालमतिलङ्घ्य पुनरप्यपरोऽश्वो दत्तस्तदा सातिरिक्तान्दत्ताश्वसंख्याकान्पुरोडाशान्निरुप्य सौर्यमनुनिर्वपेत् । तेनादित्यमेवोर्ध्वचारिणं कुरुते । स चादित्यो विलम्बदोषं परिहरन्नुपरिष्टाद्वर्तत इत्यभिप्रायः । इष्ट्यङ्गत्वेनावभृथं विधत्ते - अपोऽवभृथमिति । अपः प्राप्य तत्रावभृथं कर्म कुर्यात् । तेन वरुणो निराकृतो भवति । अङ्गान्तरं विधत्ते - अपोनप्त्रीयमिति । अपो नप्ता देवता यस्य सोऽयमपोनप्त्रीयस्तं चरुमवभृथदेशाद्यज्ञभूमौ समागत्य निर्वपेत् । अप्सु योनिरुत्पत्तिर्यस्याश्वस्य सोऽयमप्सुयोनिः । उच्चैःश्रवसोऽश्वस्य समुद्रादुत्पत्तिः पुराणेषु प्रसिद्धा । तस्मादपोनप्त्रीयचरुणा तमश्वं स्वकीययोनिगामिनं करोति । स चाश्वः शान्तः सन् रोगमनुत्पाद्यैनं यजमानं सेवते ।

वेदवारिधिः प. रामानुजाचार्यः

# भट्टभास्करभाष्यम्

1प्राजापत्यो वा अश्व इति ॥ प्रजापतिरात्मदेवत्यमश्वं वरुणायानयत् अददात् । सोश्वं ददन्स्वमात्मानमश्वस्य देवतामार्छत् आर्तामकरोत्, ईशितव्यापगमात् देवतात्वहानिरेवार्तिः । ततश्च स प्रजापतिः विगळितदेवताभावः परितस्सर्वतोऽदीर्यत विपन्नोऽभवत् वरुणपाशैर्गृहीत इत्यर्थः । तदेवाह - वरुणो वा इत्यादि । ननु प्रतिग्रहीतुरिदमुच्यते ; प्रतिगृह्णातीतिदर्शनात् । नैवम् । उपक्रमावगतदातृश्रुतिविरोधात् ; दातृविषयमेवेदं विपरिणम्यते । **उक्तं चेदं न्यायविधिः 'अवैदिकं च [अचोदितं] कर्मभेदात्' इत्यत्र 'सा लिङ्गादार्त्विजे स्यात्' इति** । तस्मादुपक्रमोपसंहाराविरोधात्मकलिङ्गबलेन प्रतिग्राहयतीत्यर्थो युज्यते । तस्माद्दाता प्रजापतिः वारुणेन चतुष्कपालेन वरुणपाशादमुच्यत । तस्मादन्योऽपि यावतोऽश्वान्प्रतिगृह्णीयात्प्रतिग्राहयेत् तावतो वारुणान् चतुष्कपालान्निर्वपेदिति । **इदं वैदिकेऽश्वप्रतिग्रह इति वेदितव्यम् । उक्तं हि 'दोषात्त्विष्टिर्लौकिके स्यात्' इत्यत्र 'अर्थवादो वानपवादात्तस्माद्यज्ञे प्रतीयेत' इति । तत्रान्तर्भावितण्यर्थो गृह्णातिर्वेदितव्यः । यद्वा - ण्यन्तादेव लकारे 'बहुलमन्यत्रापि' इति णिलुक्, तत्र व्यत्ययेन श्नाप्रत्ययः ।**

केचिदाहुः - 'वारुणो वा अश्वः' इति वरुणदेवत्योऽश्वः ; स प्रजापतिना वरुणाय दीयमानो वरुणं स्वां देवतामपि आत्मीयदेवतात्वेन वर्तमानमपि प्रतिग्रहस्य दुष्टत्वात् आर्तमकरोत् । स वरुणः पर्यदीर्यत वरुणपाशैर्गृहीतो व्यापद्यत । अथ स वरुणो वारुणं चतुष्कपालं दृष्ट्वा वरुणाय निरवपत् । ततो वरुणो वरुणपाशादमुच्यत । वारकं वा पापं वरुणः । यो नाम कश्चित् वरुणाख्यो वा अश्वं प्रतिगृह्णाति वरुण एनं गृह्णाति । तस्मात् 'यावतोऽश्वान्' इति प्रतिग्रहीतुरेव विधीयते इति । **तदिदं न्यायविरुद्धमित्यादिना नाद्रियामहे ।**

ननु कथमेकस्यैव देवतात्वं यजमानत्वं च स्यात्? । नैष दोषः । 'इन्द्रो वै सदृङ् देवताभिरासीत्' इत्यत्र यथा इन्द्र आत्मार्थमैन्द्रमानुषूक-मेकादशकपालं विदधाति, यथा 'वरुणं सुषुवाणम्' इत्यत्र वरुणो वारुणीं वशामालभते एवमिदं भविष्यति ॥

2एकमतिरिक्तमिति ॥ यावतः प्रतिगृह्णीयात्तेभ्योतिरिक्तं निर्वपेत्; यथा षड्ध्रतिगृह्य सप्तमं निर्वपेदिति । यमेवेति । यं प्रतिग्रहीष्यन्भवति यं वा पूर्वप्रतिगृहीतं नाध्येति नाधिगच्छति न स्मरति वा तस्मात्सर्वस्मान्निमित्तात् उपजाताद्वरुणपाशान्मुच्यते । 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठीप्रतिषेधः ॥

3यद्यपरमिति ॥ अश्वप्रतिग्राही कृत्वापि वारुणीमिष्टिं यदि भूयोऽपि प्रतिग्रहीष्यन् स्यात्सौर्यमेककपालमनुनिर्वपेत् । अपरमिति क्रियाविशेषणम् । अमुमादित्यमुच्चारं उच्छ्रिताचारं उपरि चरन्तं वा कुरुते, ततस्स एव वरुणपाशादिदोषं परिहरिष्यतीति ॥

4अपोवभृथकर्मार्थमवैति ॥ अपोनप्त्रीयं चरुमवभृथादेत्य पुनर्निर्वपेत् । 'अपोनप्त्रपांनप्तृभ्यां घः' 'छ च' इति छप्रत्ययः । अपांनप्ता चतुर्थः अपोनप्ता । छान्दसो युगगं [सोलुक्] । अप्सुयोनिरिति । 'अपो योनियन्मतुषु सप्तम्या अलुक्' इत्यलुक् । शान्त इति । निवृत्तवरुणपाशादिदोषस्सुखहेतुरेवोपतिष्ठते मित्रवदुपसंप्राप्नोति ॥

वेदवारिधिः प. रामानुजाचार्यः

# सायणभाष्यम् - Tamil Translation

1. ப்ரஜாபதி, தனது குதிரைக்குத் தலைவனான தன்மையை வருணனுக்கு அளித்து விட்டு, அதனால் தனது உடம்பில் மிகுந்த நோயை உண்டாக்கிக் கொண்டனன். அந்நோய், வருணபாசமானதால் வருணனுக்குச் செய்த இஷ்டியால் நீங்கிற்று.

2. **குதிரையைத் தானம் செய்கின்றவன், வருணதேவதைக்கு நான்கு கபாலங்களில் புரோடாசம் செய்தல் வேண்டும்.**

3. குதிரைக்கு நான்கு கால்களிருத்தலின் கபாலங்கள் நான்காம், இது மிகுந்த சம்பத்தைத் தருகின்றது.

4. முன்னும் பின்னும் மறந்தும் தானம் கொடுக்கப்பட்ட குதிரைகளின் பொருட்டு குதிரைகளைவிட மிகுதியாக ஒரு புரோடாசம் செய்தல் வேண்டும்.

சிலர் குதிரையைத் தானமாக வாங்கினவன் இவ்விஷ்டியைச் செய்தல் வேண்டுமென்பர்.

5. குதிரையை தானம் கொடுத்தவுடன் யாகம் செய்யில் புரோடாசம் ஒன்று மிகுதியாகச் செய்தல் வேண்டும். தானம் செய்தவுடன் யாகம் செய்யாமல் பிறகு குதிரையைத் தானம் செய்து யாகம் செய்யில் மிகுதியாகப் புரோடாசம் செய்வதுடன் சூரியனுக்கும் ஒரு கபாலத்தில் புரோடாசம் செய்தல் வேண்டும்.

6. நீரிருக்குமிடம் சென்று வேள்வியின் முடிவு நீராடல் செய்தல் வேண்டும். இதனால் வருணன் விலக்கப்படுகின்றான்.

7. மீண்டும் வேள்விச் சாலையை யடைந்து நீரைத் தேவதையாக (பேரனாக) வுடையதற்குப் பொங்கல் செய்து யாகம் செய்தல் வேண்டும். அக்குதிரை, பொறுமையுடையதாயிருந்து நோயை யுண்டாக்காமல் இவ் வெஜமானனை வழிபடுகின்றது.

वेदवारिधिः प. रामानुजाचार्यः

# सायणभाष्यस्य कन्नडभाषानुवादः

ಈ ಹನ್ನೆರಡನೆಯ ಅನುವಾಕದಲ್ಲಿ ಅಶ್ವದಾನೇಷ್ಟಿಯು ಹೇಳಲ್ಪಟ್ಟಿದೆ. ಇದು ವೈದಿಕವಾದ ಅಶ್ವದಾನಕ್ಕೆ ಪ್ರಾಯಶ್ಚಿತ್ತರೂಪವಾಗಿ ವಿಹಿತವಾದ ವಾರುಣೇಷ್ಟಿ. ಇದರ ಉಪಾಖ್ಯಾನವು ಹೀಗಿದೆ; ಪ್ರಜಾಪತಿಯು ವರುಣನಿಗೆ ಅಶ್ವದಾನವನ್ನು ಮಾಡಿದನು. ಇದರಿಂದ ಅವನು 'ಪ್ರಾಜಾಪತ್ಯೋ ವಾ ಅಶ್ವಃ' ಎಂದು ಪ್ರಸಿದ್ಧವಾದ ಅಶ್ವದೇವತ್ವ-ವನ್ನೂ ಕಳೆದುಕೊಂಡನು. ಅವನ ಶರೀರವೂ ವರುಣಪಾಶರೂಪವಾದ ರೋಗದಿಂದ ಪೀಡಿತವಾಯಿ . ಇದರ ಪರಿಹಾರವನ್ನು ಚಿಂತಿಸಿ, ಪ್ರಜಾಪತಿಯು ವಾರುಣಚತುಷ್ಪಾಲಯಾಗವನ್ನು ಉಪಾಯವಾಗಿ ಕಂಡುಕೊಂಡನು. ಈ ಯಾಗವನ್ನು ಮಾಡಿದನು. ವರುಣನ ಅನುಗ್ರಹದಿಂದ ರೋಗಮುಕ್ತನಾದನು.

ಕುದುರೆಯನ್ನು ದಾನ ಮಾಡುವವನನ್ನು ವರುಣನು ರೋಗರೂಪವಾದ ಪಾಶದಿಂದ ಹಿಡಿಯುತ್ತಾನೆ. ಆದುದರಿಂದ ಎಷ್ಟು ಕುದುರೆಗಳನ್ನು ದಾನ ಮಾಡುತ್ತಾನೆಯೋ ಅಷ್ಟು ಸಂಖ್ಯೆಯ ಚತುಷ್ಕಪಾಲಪುರೋಡಾಶದ್ರವ್ಯವುಳ್ಳ ವರುಣ-ದೇವತಾಕವಾದ ಯಾಗಗಳನ್ನು ಅನುಷ್ಠಿಸಬೇಕು. ಇದರಿಂದ ವರುಣನಿಗೆ ಸೇರಬೇಕಾದ ಭಾಗವನ್ನು ಕೊಟ್ಟು ಆರಾಧಿಸಿದಂತಾಗುತ್ತದೆ. ಕುದುರೆಯೂ ನಾಲ್ಕು ಕಾಲುಗಳ ಪ್ರಾಣಿಯಾಗಿದೆ. [ಆದುದರಿಂದ ಈ ಅನುರೂಪವಾದ ಸಂಖ್ಯೆಯ ಪುರೋಡಾಶಗಳಿಂದ ಫಲಸಮೃದ್ಧಿಯಾಗುತ್ತದೆ]. ವರುಣದೇವನು ತೃಪ್ತನಾಗಿ ಈ ಯಜಮಾನನಿಗೆ ಜಲೋದರಾದಿರೋಗಗಳು ಬಾರದಂತೆ ಮಾಡಿ ರಕ್ಷಿಸುತ್ತಾನೆ. ಪುರೋಡಾಶಗಳೂ ಚತುಷ್ಕಪಾಲಗಳು, ಕುದುರೆಯೂ ನಾಲ್ಕು ಕಾಲಿನದು. ಈ ಸಂಖ್ಯಾಸಾದೃಶ್ಯವು ಫಲಸಮೃದ್ಧಿಗೆ ಕಾರಣವಾಗುತ್ತದೆ. ಬೇಗ ರೋಗಪರಿಹಾರವನ್ನು ಉಂಟುಮಾಡುತ್ತದೆ.

ಎಷ್ಟು ಚತುಷ್ಕಪಾಲಯಾಗಗಳನ್ನು ಮಾಡಬೇಕಾಗಿದೆಯೋ ಅಷ್ಟಕ್ಕಿಂತಲೂ ಹೆಚ್ಚಾಗಿ ಒಂದು ಚತುಷ್ಪಾಲಯಾಗವನ್ನು ಮಾಡಬೇಕು. ಇದರಿಂದ ಮುಂದೆ ಮಾಡಬಹುದಾದ ಅಶ್ವದಾನದೋಷ ಪರಿಹಾರವಾಗುತ್ತದೆ. ಹಾಗೆಯೇ ಯಾವುದನ್ನಾದರೂ ಮರೆತುಬಿಟ್ಟರೆ ಅದರಿಂದ ಸಂಭವಿಸಬಹುದಾದ ವರುಣಪಾಶರೂಪವಾದ ದೋಷವೂ ಪರಿಹೃತವಾಗುತ್ತದೆ. ಯಜಮಾನನು ವರುಣಪಾಶದಿಂದ ಮುಕ್ತನಾಗುತ್ತಾನೆ. ಅಶ್ವದಾನ ಮಾಡಿದಾಗಲೇ ಚತುಷ್ಕಪಾಲ ಯಾಗವನ್ನು ಮಾಡದೆ ಕಾಲಾಂತರದಲ್ಲಿ ಮತ್ತೊಂದು ಅಶ್ವದಾನವನ್ನು ಮಾಡಿದರೆ, ಚತುಷ್ಪಾಲಯಾಗ ಮಾಡಿ ಕಾಲಾತಿಕ್ರಮದೋಷ ಪರಿಹಾರಾರ್ಥವಾಗಿ ಸೌರ್ಯಚರುಯಾಗವನ್ನು ಅನುಷ್ಟಿಸಬೇಕು. ಇದರಿಂದ ಪ್ರಸನ್ನನಾದ ಸೂರ್ಯದೇವನು ದೋಷಪರಿಹಾರವನ್ನು ಮಾಡುತ್ತಾ ಅಂತರಿಕ್ಷದಲ್ಲಿ ಪ್ರಕಾಶಿಸುತ್ತಿರುತ್ತಾನೆ.

ನೀರಿನಲ್ಲಿ ಅವಭೃಥಕರ್ಮವನ್ನು ಅನುಷ್ಠಿಸಬೇಕು. ಇದರಿಂದ ಜಲಾಧಿಪತಿಯಾದ ವರುಣನನ್ನು ನೀರಿನಲ್ಲಿಯೇ ತೃಪ್ತಿಪಡಿಸಿ ದೂರ ಮಾಡಿದಂತೆ ಆಗುತ್ತದೆ. ಇದರಿಂದ ರೋಗಭಯವು ತಪ್ಪುತ್ತದೆ.

वेदवारिधिः प. रामानुजाचार्यः

ಅವಭೃಥದ ಅನಂತರದಲ್ಲಿ ಮತ್ತೆ ಯಾಗಭೂಮಿಗೆ ಬಂದು ಅಪೋನಪ್ತೃ ದೇವತೆಗೆ ಚರುದ್ರವ್ಯಕವಾದ ಯಾಗವನ್ನು ಅನುಷ್ಠಿಸಬೇಕು. ಇದು ಅಶ್ವದಾನೇಷ್ಟಿಯಷ್ಟು ನೀರೇ ಕುದುರೆಯ ಉತ್ಪತ್ತಿಸ್ಥಾನ [illegible] ಗದಿಂದ ಉತ್ಪತ್ತಿ

# पूर्वमीमांसासूत्रे

(पञ्चदशे दातुर्वारुणीष्ट्यधिकरणे सूत्रे 36-37) ।

3.4. अचोदितं कर्मभेदात् ॥36॥ सा लिङ्गादार्त्विजे स्यात् ॥ 37 ॥

सारबोधिनी सूत्रवृत्तिः – (पण्डितरत्नम् तर्कतीर्थम् कस्तूरिरङ्गाचार्य स्वामिनः)

(३.४.१५) - अचोदितं च कर्मभेदात् ॥३६॥

इयमिष्टिः दातुः प्रतिग्रहीतुर्वेति संशये पूर्वपक्षमाह – अचोदितमिति ॥ कर्मणोः ददातिप्रतिगृह्णात्यर्थयोः भेदात् प्रकृते प्रतिगृह्णीयादिति श्रवणेन दाने निमित्ते अचोदितं अविहितमिदं कर्म, अतः प्रतिगृहीतुरिष्टिरिति भावः ॥३६॥

सा लिङ्गादार्त्विजे स्यात् ॥३७॥

सिद्धान्तमाह - सेति । सा इष्ट्यधिकृतिः आर्त्विजे ऋत्विक्प्रेरके यजमाने दातरीति फलितं स्यात् । लिङ्गात् "प्रजापतिर्वरुणायाश्वमनयत्" इत्युपक्रमे दातुः पीडाश्रवणलिङ्गात् । उपक्रमानुसारेण "यावतोऽश्वान् प्रतिगृह्णीयात्" इत्यस्य प्रतिग्राहयेदित्यर्थकरणमावश्यकमिति भावः ॥३७॥

वेदवारिधिः प. रामानुजाचार्यः



श्रीमते पराङ्कुशार्यमहादेशिकाय नमः । ऋचः सामानि यजूꣳषि । सा हि श्रीरमृता सताम् ।

**पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)**

pivstrust.org ✉: pivstrust@gmail.com



# विचारः - पूर्वोत्तरपक्षौ

प्रजापतिर्वरुणायाश्वमनयत् – कर्ता - प्रजापतिः, सम्प्रदानम् – वरुणः, कर्म - अश्वः

स स्वान्देवतामार्च्छत् स पर्यदीर्यत स एतँव्वारुणञ्चतुष्कपालमपश्यत्तन्निरवपत्ततो वै स वरुणपाशादमुच्यत – अत्र तच्छब्दः कं निर्दिशति इत्यत्र विचारः

वरुणो वा एतङ्गृह्णाति योऽश्वम्प्रतिगृह्णाति – हेत्वपदेशः – एतावान् अर्थवादः परकृतिः

अर्थवादः

यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणाञ्चतुष्कपालान्निर्वपेत् – विधिः

उद्देश्यः प्रतिग्रहीता - साक्षात् कर्ता – पूर्वपक्षे (प्रसिद्धेः)

सिद्धान्ते - तत्प्रयोजको हेतुश्च – प्रतिगृह्णाति – प्रतिग्राहयति (ददाति) – हेतुकर्ता (ण्यर्थः)

वरुणमेव स्वेन भागधेयेनोप धावति स एवैनँव्वरुणपाशान्मुञ्चति

चतुष्कपाला भवन्ति चतुष्पाद्ध्यश्वस्समृद्ध्यै

एकमतिरिक्तन्निर्वपेद्यमेव प्रतिग्राही भवति यँव्वा नाध्येति तस्मादेव वरुणपाशान्मुच्यते - णिच्
यद्यपरम्प्रतिग्राही स्यात्सौर्यमेककपालमनुनिर्वपेदमुमेवादित्यमुच्चारङ्कुरुते - णिच्

अपोऽवभृथमवैत्यप्सु वै वरुणस्साक्षादेव वरुणमव यजते

अपोनप्त्रीयञ्चरुम्पुनरेत्य निर्वपेदप्सुयोनिर्वा अश्वस्स्वामेवैनँय्योनिङ्गमयति स एनꣳ शान्त उप तिष्ठते ॥

वेदवारिधिः प. रामानुजाचार्यः






# शाबरभाष्यम्

**अचोदितं च कर्मभेदात् ॥ मी.सू. 3.4.30 ॥**

'यावतोऽश्वान् प्रतिगृणीयात्, तावतो वारुणांश्चतुष्कपालान् निर्वपेद्' इति {*तै.सं. 2.3.12.1*} । तत्रैतत् समधिगतम् - वैदिकेऽश्वप्रतिग्रह इष्टिर् इति । अथेदानीं संदिह्यते - किं प्रतिग्रहकर्त्रा कर्तव्या, यस्मै दीयते, उत हेतुकर्त्रा, यो ददातीति । किं प्राप्तम्? अचोदितं च कर्मभेदात्, न दानस्य कर्तुर् इष्टिश् चोद्यते, प्रतिग्रहकर्तुस् ताम् अवगच्छामः - यावतोऽश्वान् प्रतिगृह्णीयात् तावतश् चतुष्कपालान् वारुणान् निर्वपेद् इति, तस्मात् प्रतिग्रहीत्रर्त्विजा कर्तव्येति ।

**सा लिङ्गाद् आर्त्विजे स्यात् ॥ मी.सू. 3.4.31 ॥**

नैषा प्रतिग्रहकर्तुः, किं तर्हि हेतुकर्तुः स्यात् । कुतः? लिङ्गात् । किं लिङ्गम्? पूर्वपदानाम् उत्तरैः पदैर् यथार्थम् अभिसंबन्धः । इदं श्रूयते - प्रजापतिर्वरुणायाश्वम् अनयद् इति, प्रजापतिरश्वस्य दाता कीर्तितः, वरुणः प्रतिग्रहीता, स स्वां देवताम् आर्च्छद् इति । स इति सापेक्षं पूर्वप्रकृतं वाक्यशेषम् अपेक्षते, स इति प्रजापतिं प्रतिनिर्दिशतीति तेन सहैक्यवाक्यतां याति । सामानाधिकरण्याच्च प्रजापतेरेव प्रतिनिर्देशोऽवकल्पते, न तु वरुणस्य, वैयधिकरण्यात् । स पर्यदीर्यत इत्येषोऽपि प्रजापतिमेव प्रतिनिर्दिशति पूर्वप्रकृतम्, तेन च सहैकवाक्यतां याति । स एवैतं वारुणं चतुष्कपालमपश्यदिति प्रजापतिरेवेति, तं निरवपत् प्रजापतिरेवेति, ततो वै स वरुणपाशादमुच्यत प्रजापतिः । वरुणो वा एतं गृह्णातीति हेत्वपदेशोऽयम्, यस्माद् एव प्रजापतिर्वरुणायाश्वं दत्त्वा परिदीर्णः, तस्माद्योऽश्वं प्रतिगृह्णाति प्रयच्छति, तं वरुणो गृह्णाति, स परिदीर्यत इति । यतस्तु वारुणेन प्रतिमुक्तः, तस्मादन्येनाप्यश्वं प्रयच्छता वारुणो निर्वप्तव्य इत्यश्वस्य दातुर्वारुणीष्टिः प्रशस्यते, कर्तव्यत्वेनेनाख्यातेन । तस्मादश्वं दत्त्वा वारुणीमिष्टिं निर्वपेद् इति ।

वेदवारिधिः प. रामानुजाचार्यः

# शाबरभाष्यम् (अनुवर्तते)

आह, ननु योऽश्वं प्रतिगृह्णाति स निर्वपेदित्युच्यते । एवं सत्यन्यथोपक्रान्ते वाक्येऽन्यथोपसंहृत उपक्रमोऽप्यनर्थकः स्यात्, उपसंहारोऽपि । तस्मादुपक्रमे वा शब्दार्थ उपसंहारवशेन कल्पनीयः, उपसंहारे वोपक्रमवशेन । तत्र प्रजापतिर्वरुणायाश्वमनयदिति, वरुणादश्वं प्रत्यगृह्णादित्युपसंहारानुरोधेन कल्प्येत, यद्वोपक्रमवशेनोपसंहारम्, योऽश्वं प्रतिगृह्णातीति, योऽश्वं प्रतिग्राहयतीति । तत्र - मुख्यं वा पूर्वचोदनाल्लोकवद् इति (मी.सू. 12.2.23) प्रथममनुग्रहीतव्यं विरोधाभावात् । पश्चात्तनं तु विरोधाल्लक्षणया कल्पनीयम् ।

अपि च, प्रजापतिर्वरुणायाश्वमनयदिति वरुणादश्वं प्रत्यगृह्णादिति बह्वसमञ्जसं कल्पयितव्यम् । प्रतिगृह्णातीत्येष शब्दः, प्रतिग्राहयतीत्येतमर्थं शक्नोति यया कयाचिच्छक्त्या वक्तुम्, यो हि तदाचरति, येन च क्रिया प्रणाड्यापि सिध्यति, स तस्याः क्रियायाः कर्तेति शक्यते वदितुम्, यथा षड्भिर्हलैः कर्षतीति संविधानं कुर्वन् विलेखनमकुर्वन्न् अप्युच्यते, तत्समर्थमाचरतीति । एवमिहापि स प्रतिग्रहसमर्थमाचरति यो ददाति । तस्माद्ददत् प्रतिगृह्णातीति शक्यते वदितुम् । तस्मादध्यवधार्येदम् अवक्लृप्तम् । ददत् प्रतिगृह्णातीत्युच्यते, तस्य च वारुणीष्टिर् इति ।

वेदवारिधिः प. रामानुजाचार्यः





# सेश्वरमीमांसा 3.4.15 (पाण्डुलिपिप्रतिकृतयः)

**अचोदितं च कर्मभेदात् ॥**

स्यात्तदेवं यदि दातुरिष्टिः स्यात्, प्रतिग्रहीतुरेवेयमिति प्रत्यवस्थानात् सङ्गतिः । किमियमिष्टिरश्वप्रतिग्रहीतुः साक्षात्कर्तृरुत हेतुसंज्ञकप्रयोजककर्तुर्दातुरिति संशयः । तदर्थश्च अर्थवादप्रसिद्ध्योर्विरोधे किं बलीय इति चिन्त्यते । यदि प्रसिद्धिर्बलीयसी तदा प्रतिगृह्णीयादित्यस्य साक्षात् प्रतिग्रहकर्तर्येव प्रसिद्धिप्राचुर्यात्प्रतिग्रहीतुरिष्टिः । यद्यर्थवादो बलीयान् तदा दातुरिति । तत्र प्रतिग्रहीतुरित्याह अचोदितश्चेति । कर्म वारुणचतुष्कपालेष्टिरूपं **कर्म अचोदितं** दातुरविहितम् । कुतः **भेदात्**, प्रतिगृह्णीयादित्यत्र प्रसिद्धिप्राचुर्येण प्रतीयमानस्य साक्षात् प्रतिग्रहकर्तुर्हेतुकर्तृभूतदात्रपेक्षया भेदादित्यर्थः । एतदुक्तं भवति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान्प्रतिगृह्णीयादित्यत्र साक्षात् प्रतिग्रहकर्तैव प्रसिद्धिप्राचुर्येण प्रथमं प्रतीयते, नतु हेतुकर्ता । नच बाधकमन्तरेण प्रथमोपस्थितपरित्यागो न्याय्यः । नच प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्च्छत्स पर्यदीर्यतेत्यादिपरकृतिरूपार्थवादाद्दातुरिष्टिः प्रतीयत इति तदविरोधाय प्रथमोपस्थितपरित्याग इति वाच्यम्, दातुरप्यावश्यकेयमिष्टिः किं पुनः प्रतिग्रहीतुरित्यतदर्थपरतया विरोधेनोपपत्तेः तस्मात् प्रतिग्रहीतुरेवेष्टिरिति ॥

वेदवारिधिः प. रामानुजाचार्यः





pivstrust.org ✉: pivstrust@gmail.com



# सेश्वरमीमांसा 3.4.15

अत्राभिधीयते - **सा लिङ्गादार्त्विजे स्यात्** ॥

सा वारुणचतुष्कपालेष्टिः । आर्त्विजे ऋत्विक्सम्बन्धिनि, ऋत्विग्भ्यः क्रियमाणेऽश्वदाने स्यात्, अश्वदातुः स्यादिति पर्यवसितोऽर्थः । कुतः, लिङ्गात् अर्थवादस्थपदानां विधिवाक्यस्थपदैर्यथावस्थितार्थपरतयाभिसम्बन्धरूपलिङ्गादित्यर्थः । एतदुक्तं भवति - यद्यपि ‘योऽश्वं प्रतिगृह्णाति यावतोऽश्वान्प्रतिगृह्णाती’त्यत्र प्रसिद्धिप्राचुर्येण प्रतिग्रहे साक्षात् कर्तैव प्रथमं प्रतीयते, तथापि ‘तत्प्रयोजको हेतुश्चे’ति प्रयोजकहेतोरपि कर्तृसंज्ञाविधानेन ‘लः कर्मणि च भावे चाकर्मकेभ्य’ इतिविहितलकारस्थले हेतुकर्तुरपि प्रतीतिसम्भवात् । प्रकृते तत्परत्वमेवाश्रयणीयम् उपक्रमादिवदर्थवादस्यापि तात्पर्यग्राहकत्वात् अर्थवादे च हेतुकर्तुरेवेष्टिः प्रतीयते । तथाहि – ‘प्रजापतिर्वरुणायाश्वमनयदि’ति प्रापणस्य परस्वत्वापादनरूपत्वात् प्रजापतेर्दातृत्वं प्रतीयते । वरुणस्य तु प्रतिग्रहीतृत्वं । ‘स स्वान्देवतामार्च्छदि’ति स प्रजापतिः स्वां देवतामार्च्छदिति स प्रजापतिः स्वां देवतां वरुणं पूर्ववाक्ये वरुणायेति वरुणस्य संप्रदानतया निर्दिष्टत्वात् संप्रदानस्य चोद्देश्यत्वात् तदादाय देवतात्वव्यपदेशः । आर्च्छत् प्राप्तवान् । तेन प्रजापतिरश्वं दत्वा वरुणग्रहं प्राप्त इत्यर्थत्वलाभेन ‘वरुणो वा एतं गृह्णाति .. यावतोऽश्वान् प्रतिगृह्णीयादि’-त्येतदपि प्रतिग्रहहेतुकर्तृपरमेवेति प्रतीयते । पूर्ववाक्योक्तस्य वरुणग्रहप्राप्तिरूपदानफलस्यैवात्र ‘वरुणो वा एतं गृह्णाती’त्यनेन प्रत्यभिज्ञानेन तद्धेतोरपि पूर्वोक्तस्यैवात्र गृहीतुमुचितत्वात् ।

नच ‘स स्वान्देवतामि’त्यस्य स वरुण आत्मरूपान्देवतामार्च्छदित्यर्थसम्भवेन तत्रापि साक्षात्प्रतिग्रहकर्तुरेव वरुणग्रहप्राप्तिः प्रतीयत इति वाच्यम्, समानविभक्ति-निर्देशादेकस्मिन् कर्मकर्तृभावविरोधात् । ‘स्वो ज्ञातावात्मनि स्वमि’त्यभिधानकोशानुसारेण स्वमिति नपुंसकलिङ्गप्रसङ्गाच्च स स्वामिति वाक्यस्य साक्षात्प्रतिग्रहकर्तृपरत्वासम्भवात् । तत ‘आर्च्छत्स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत्तं निरवपत्ततो वै स वरुणपाशादमुच्यते’त्यनन्तरवाक्येन हेतुकर्तुः प्रजापतेरेवेष्टिप्रतिपादनपूर्वकं वरुण-ग्रहविमोचनप्रतिपादनात् ‘तावतो वारुणांश्चतुष्कपालान्निर्वपेत् स एवैनं वरुणपाशान्मुञ्चती’त्येतावद्वाक्येनापि हेतुकर्तुरेवेष्टिर्विधीयत इति युक्तम् । एवं विध्यर्थवादवाक्ययोः स्वार्थपरत्वेनैकवाक्यत्वोपपत्तावर्थवादस्य प्रसिद्धिमात्रेणान्यपरत्वकल्पनमयुक्तम् । तस्माद्धेतुकर्तुर्दातुरेवेयमिष्टिरिति ।

वेदवारिधिः प. रामानुजाचार्यः





# सेश्वरमीमांसा 3.4.15

यत्तु विधिप्रयुक्तप्राबल्यमाश्रित्य प्रतिग्रहीतुरिष्टिरिति पूर्वपक्षं कृत्वा उपक्रमस्थत्वप्रयुक्तप्राबल्यमाश्रित्यार्थवादानुसारेण दातुरिष्टिरिति सिद्धान्तमारचय्य उपक्रमाधिकरणेन गतार्थताप्राप्तौ ऋगादिशब्दानां वेदेऽपि प्रयोगो दृश्यते । गृह्णातेस्तु दाने क्वचिदपि प्रयोगो न दृश्यत इत्यधिकाक्षेपपरिहारायेदमधिकरणमित्युक्तं, तदनुपपन्नं, मुख्यार्थाद्यनुपपत्तेरेव लक्षणायाः प्रयोजकत्वेन प्रयोगस्याप्रयोजकत्वात् । निरूढलक्षणायां हि प्रयोगोऽपेक्षितः । न चात्र सा । वस्तुतस्तु लक्षणापि नास्ति । 'प्रतिगृह्णीयादि'त्यस्य हेतुकर्तृपरत्वेन दातुरिष्टिरिति सिद्धान्तसिद्धेः । नच तत्र प्रयोगाभावः 'षड्भिर्हलैः कर्षती'तिप्रयोगसत्त्वात् । नच तत्र ऋगादिपदानां लक्षणा, अत्र तु 'प्रतिगृह्णीयादि'त्यस्य न लक्षणेति वैषम्यान्न गतार्थतेति वाच्यम्, उपक्रमप्राबल्येन मुख्यार्थपरित्यागोऽपि न्याय्यश्चेत्, किमु तत्र सिद्धार्थपरित्याग इति गतार्थत्वतादवस्थ्यात् । तर्हि उपक्रमप्राबल्येन 'प्रतिगृह्णीयादि'त्यत्र सिद्धार्थपरित्यागेप्यृगादिपदानां मुख्यार्थपरित्यागोऽनुचित इत्यधिकाक्षेपपरिहारायोपक्रमाधिकरणमिति न शङ्कनीयम् । उपक्रमोपसंहारविरोधे उपक्रमप्राबल्येन सिद्धान्तकथने यावता विरोधोपशमस्तावानुपसंहार आश्रयणीय इत्यत्रैव सिद्धेः प्रसिद्धार्थपरित्यागे मुख्यार्थपरित्यागे वा विशेषाभावादत एवात्र गृह्णातेर्दाने लक्षणेति पक्षान्तरमप्युक्तम् । अथ उपक्रमप्राबल्यमनुपजीव्यैवोक्तरीत्याधिकरणं वर्णनीयम् । एवमधिकरणान्तरसम्भवेनैतत् सूत्रद्वयं पूर्वाधिकरण इदं वारुणेष्टिरूपं कर्म यज्ञेऽप्यचोदितं यज्ञाङ्गभूतवैदिकदाननिमित्तकमपि न भवेत् । अतः भेदात् लौकिकवैदिकभेदेन दानार्थे सति वैदिकनिमित्तकमेवेति निर्णेतुमशक्यत्वात्तस्मादुभयत्र स्यादिति शङ्का, सा लिङ्गात् वैदिकत्वसामान्यादार्त्विजे ऋत्विक्सम्बन्धिनि वैदिके दाने स्यादिति समाधानमित्येतदुभयपरतया तच्छेषभूतमित्येतदपि मन्दप्रयोजनत्वादुपेक्ष्यम् ॥

वेदवारिधिः प. रामानुजाचार्यः







पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)
pivstrust.org
: pivstrust@gmail.com

# भाट्टदीपिका - दातुर्वारुणीष्टिः

सेयमिष्टिर्न प्रतिग्रहीतुः, अपि तु दातुरेव, उपक्रमस्थार्थवादे प्रजापतेर्दातुरेव प्रधानभूतस्य स इत्यनेन परामर्शात् प्रजापतिरेव वरुणायाश्वं दत्वा स्वां देवतां सम्प्रदानरूपां वरुणं जलोदररूपेण प्राप्त इत्यर्थावगमात्तस्यैव तन्निर्मोकार्थमिष्टिकर्तृत्वावगतेरुच्चैस्त्वादिवदेवोप-संहारस्थप्रतिग्रहीतृपदस्य दातृलक्षणार्थत्वात् ।

अथवाऽख्यातेन साक्षात्प्रयोजकसाधारण्येन कर्तृमात्राक्षेपात्साक्षात्सम्भवे प्रयोजक-कर्त्रनाक्षेपेऽपि इहोपक्रमानुरोधेन तदाक्षेपात्प्रतिग्रहं यः कारयेदित्यर्थावगतेर्विनैव लक्षणां दातुरिष्टिः । न चैवं तेन गतार्थत्वं मैत्रायणीयशाखायां "स एषोऽश्वः प्रतिगृह्यते" इत्येवं प्रतिग्रहोपक्रमाया एवास्या आम्नानात् तद्वशेनोपक्रमस्थेऽप्यर्थवाद एव लक्षणेत्यधिका-शङ्कायास्सत्वात् । तन्निवृत्तिस्तु - शाखान्तरे प्रतिग्रहीतुरिष्ट्यवगमेऽप्यस्यां शाखायां प्रबलोपक्रमे प्रमाणाभावेन लक्षणानुपपत्तेरेतद्वचनेन दातुरिष्टौ बाधकाभावात् । दूरस्थ-कर्मानुवादेनोद्देश्यसम्बन्धानुपपत्तेरस्य कर्मान्तरविधायकत्वाच्च । नामादीनामुपस्थापकाना-मभावेन शाखान्तरन्यायाभावाच्च । दातुरुपक्रमानुरोधेन वा मैत्रायणीयशाखास्थोप-क्रमस्यापि प्रयोजककर्तृत्वाभिप्रायेण व्याख्यातुं शक्यत्वाच्च ॥१५॥

वेदवारिधिः प. रामानुजाचार्यः

# शास्त्रदीपिका (पार्थसारथिमिश्रस्य) दातुर्वारुणीष्ट्यधिकरणम् (3.4.15)

अचोदितं च कर्मभेदात् ॥३६॥ सा लिङ्गादार्त्विजे स्यात् ॥३७॥

यावतः प्रतिगृह्णीयादश्वांस्तावत्य इष्टयः । प्रतिग्रहीतुर्दातुर्वा स्यादाद्योऽस्तु यथाविधि ॥

असंजातविरोध्यर्थवादाद्दातुः प्रजापतेः । इष्टिः श्रुता ततो दातुर्णिजर्थेऽपि विधिं नयेत् ॥

इयमेवेष्टिरुदाहरणं किमियं प्रतिग्रहस्य स्वतन्त्रकर्तुरुत हेतुकर्तुर्दातुरिति । तदर्थं च प्रक्रमस्थस्यार्थवादस्योपसंहारस्थ-विध्युद्देशस्य च विरोधे कस्य बलीयस्त्वमिति चिन्त्यते । विध्युद्देशबलीयस्त्वे प्रतिग्रहीतुः, यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति वचनात् । अर्थवादबलीयस्त्वे दातुः, प्रजापतिर्वरुणायाश्वमनयदिति प्रजापतिर्दाता संकीर्तितो वरुणः प्रतिग्रहीता स स्वां देवतामार्च्छदिति । स इति समानविभक्तिनिर्दिष्टः प्रजापतिः स्वां देवतां पूर्ववाक्ये संप्रदाननिर्देशाद्वरुणं तेन प्रजापतिरश्वं दत्वा वरुणग्रहं प्राप्त इत्यर्थः । 'स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत्तं निरवपत्ततो वै स वरुण-पाशादमुच्यते'ति सर्वत्र प्रजापतिरेव दाताऽनुषज्यते । तेन परकृतिसरूपेऽर्थवादे दातुरिष्टिर्वर्णितेत्यन्योऽपि दत्वैवं कुर्यादिति दातुरिष्टिरवगम्यते । तदेवं विरोधे किं बलीय इति । तत्र विध्युद्देशस्य प्रधानत्वात्तनुरोधेनार्थवादो व्याख्येयः । दातुरपि तावद्दोषः स्यात्किं पुनः प्रतिग्रहीतुरिति । तस्मात्प्रतिग्रहीतुरिति प्राप्तेऽभिधीयते –'असंजातविरोधित्वादर्थवादो यथाश्रुतः । व्याख्येयस्तद्विरुद्धत्वाद्विध्युद्देशस्य लक्षणा ॥" प्रतिगृह्णीयादिति हेतुकर्तोच्यते, अस्ति हि तस्यापि हेतुकर्तृत्वं 'तत्प्रयोजको हेतुश्चे'ति चकारात्, तस्मादुपक्रमबलाद्दातुरिष्टिरिति । प्रपञ्चितं चैतद्बलीयस्त्वं 'श्रुतेर्जाताधिकारः स्या'दित्यत्र (3.3.1) । किमर्थं तर्हीदमधिकरणम् । उच्यते - ऋगादिशब्दा वेदेऽपि बहुलं दृष्टप्रयोगाः, गृह्णातिस्तु दातृव्यापारे न कश्चिद्दृष्टः, तेन नासौ तत्परत्वेन व्याख्यातुं शक्यत इति विशेषाशङ्कानिवृत्त्यर्थमधिकरणम् । अथवा भाष्यकारान्तरैः 'सा लिङ्गादार्त्विजे स्या'दिति सूत्रानुसारात् प्रतिग्रहीतुरिष्टिराश्रिता । तन्निवृत्त्यर्थमनेनैव सूत्रेण दातुरिष्टिं प्रतिपादयितुं भाष्यकारोऽधिकरणान्तरं चकार । सूत्रद्वयं तु पूर्वाधिकरण एव (शेषत्वेन) व्याख्येयम् । यज्ञेऽप्यचोदितमिदं कर्मभेदे सति निर्णयाशक्तेः । अतः उभयत्र स्यादिति चोद्यम् । तस्योत्तरं सा लिङ्गाद्वैदिकाद्वैदिकत्वसामान्यादार्त्विज्ये ऋत्विक्संबन्धिनि वैदिके दाने स्यादित्यर्थः ॥१५॥

वेदवारिधिः प. रामानुजाचार्यः





pivstrust.org ✉: pivstrust@gmail.com



# मयूखमालिका - (सोमनाथीया)

**अचोदितं च कर्मभेदात्** ॥३६॥ प्रसक्तानुप्रसक्तोऽयं विचार इति दर्शयति - **इयमेवेति** । हेतुकर्तुः हेतुसंज्ञकस्य प्रयोजककर्तुरित्यर्थः । ननु विध्युद्देशे स्पष्टं प्रतिग्रहीतुरिष्ट्यवगमात्संदेह एवानुपपन्न इत्याशङ्क्य तदर्थसंशयं फलफलिभावं च वदन् संदेहमुपपादयति - तदर्थमिति । दातेति । अनयदिति नयनस्य प्रापणस्य परस्वत्वापादनरूप-त्वादिति भावः । नन्वेवमपि स वरुणः स्वां स्वात्मिकां देवतामार्च्छदित्येवं प्रतिग्रहीतुरेवेष्टिरुपक्रमेऽपीत्यत आह - स स्वां देवतामिति । समानविभक्तिनिर्देशादेकस्मिन्कर्तृकर्मभाव-विरोधात् 'स्वो ज्ञातावात्मनि स्वम्' इत्यभिधानकोशस्मृतेः स्वमिति नपुंसकत्वप्रसङ्गाच्च न स्वामिति वाक्यस्य प्रतिगृहीतृपरत्वमिति भावः । संप्रदानेति । संप्रदानस्योद्देश्यत्वा-त्तदादाय देवतात्वनिर्देशे उपपन्न इति भावः । पर्यदीर्यत वरुणग्रहणे सति जलवृद्ध्या श्वयथुना उदरं पर्यदीर्यत । प्रजापतेरुदरं परिदीर्णमासीदिति यावत् । परकृतिसरूपे परव्यापारप्रकाशक इति यावत् । ननु प्रजापतिव्यापारकथन-मात्रेण दात्रा यष्टव्यमित्यस्य कथं लाभोऽत आह - इत्यन्य इति । दातृव्यापारकथनादुपक्रम एव नूनं दातुरिष्टि-र्विधास्यत इत्यवगम्यत इति भावः । तस्मादिति । न च पूर्वाधिकरणोक्तकर्माङ्गत्वबलादेव दातुरिष्टिर्वाच्या । अन्यथा भिन्नकर्तृकत्वेन कर्माङ्गत्वमेव न स्यादिति वाच्यम् । एतदधिकरणोपजीवनेन पूर्वाधिकरणप्रवृत्तेः तत्रैवोपपादितत्वादिति । लक्षणेति । प्रतिगृह्णातिर्दानलक्षक इत्यर्थः । वस्तुतस्तु लक्षणापि नेत्याह - प्रतिगृह्णीयादिति । चकारादिति । चकारेण 'स्वतन्त्रः कर्ते'ति पूर्वसूत्रोक्तसंज्ञानुत्कर्षणादिति भावः । नन्वङ्गगुणविरोधाधिकरणन्यायेन प्रधानभूतविध्युद्दे-शानुसाराद्गुणभूतार्थवादस्यैव नयनं न्याय्यमत आह - प्रपञ्चितमिति । तदधिकरणवैषम्यं तत्रैवोक्तमित्यर्थः । मैत्रायणीयशाखायां दातुरुपक्रमाभावेऽपि तैत्तिरीय-शाखायामुपक्रमबलान्निर्णये शाखान्तरेऽपि कर्माभेदाद्दातुरिष्टिः सिद्ध्यतीति द्रष्टव्यम् । ऋगादीति । 'ऋग्भिः पूर्वाह्ण' इत्यादाविति भावः । सूत्रानुसारादिति भावः । तत्रार्त्विज्य-शब्दस्वारस्येन ऋत्विक्संप्रतिग्रहप्रतीतेरिति भावः । सूत्रद्वयमिति भावः । 'अचोदितं च कर्मभेदा'दिति सूत्रं 'सा लिङ्गादार्त्विजे स्यादि'ति सूत्रं च पूर्वाधिकरण एव शङ्कातदुत्तरत्वेन व्याख्येयमित्यर्थः । यज्ञ इति । इदं वारुणेष्टिरूपं कर्म यज्ञेऽप्यचोदितं यज्ञाङ्गभूतवैदिकदाननिमित्तकमपि न भवतीति यावत् । कुत इत्यत आह - भेद इति । लौकिकवैदिकदानभेदे दानद्वये सतीति यावत् । वैदिकस्यैवाङ्गमिति निर्णेतुमशक्यत्वात् तस्मादुभयत्र स्यादित्यर्थः । 'अधिकरणान्तरत्वे चाचोदित'मिति सूत्रस्यायमर्थः । वारुणीष्टिरूपं कर्म दातुरचोदितं दानप्रतिग्रहयोर्भेदादस्य च प्रतिग्रहसंयोगादिति ॥

वेदवारिधिः प. रामानुजाचार्यः







# मैत्रायणीसंहिता - 2-3-9

अथैषोऽश्वः प्रतिगृह्यते, स वा उभयतोदन् प्रतिगृहीतो निर्बभस्त्यस्येन्द्रियं च पशूंश्च, वरुणो वा अश्वो वरुणदेवत्यो, यो वा अश्वं प्रतिगृह्णाति वरुणः स प्रसीदति, तदश्वहविषा यष्टव्यं निर्वरुणत्वाय, चतुष्कपाला भवन्ति, चतुष्पाद्वा अश्वः, कपालैरेवैनमाप्नोति, यावन्तोऽश्वास्तावन्तः पुरोडाशा भवन्ति, सर्वत एवैनं मुञ्चत्ये,कोऽधिभवति, यन्नोपस्मरति तस्मा एव स, यः पुनः प्रतिग्रहीष्यन्त्स्यान्न स यजेत, यद्धि पुनः प्रतिगृह्णीयात् पुनर्वरुणं प्रसीदे,दथ यः पुनः प्रतिग्रहीष्यन्त्स्यात् तस्य वारुणा नेमाः स्युः सौर्यवारुणा नेमा, यद्वारुणो, वरुणादेवैनं तेन मुञ्चत्य,थ यत्सौर्यः, स्वामेव देवतामुपप्रतिगृह्णात्यात्मनोऽहिंसाया, एकविंशतिः सामिधेनीर्भवन्त्यसा आदित्य एकविंशः, प्रजापतिरसा आदित्यः, प्राजापत्योऽश्वो, यावानेवाश्वस्तमाप्नोति, सर्वे वा अन्ये पशवो योनिमन्तः पुरुषयोनयो,ऽयोनिरश्वोऽप्सुजा, यदेषोऽपोनप्त्रीयश्चरुर्भवति योनिमन्तमेवैनमकः, स्व एवैनं योनौ प्रतिष्ठापयति ॥

वेदवारिधिः प. रामानुजाचार्यः

# मीमांसा - ಮೀಮಾಂಸಾ

1) **ಪ್ರಾಯಶ್ಚಿತ್ತಾರ್ಹವಾದ ಅಶ್ವದಾನ ಯಾವುದು ?**

ಜೈ.ಸೂ. 3.4.26-28 "ಯಾವತೋಽಶ್ವಾನ್ಪ್ರತಿಗೃಹ್ಣೀಯಾತ್ ತಾವತೋ ವಾರುಣಾಞ್ಚತುಷ್ಕಪಾಲಾನ್ನಿರ್ವಪೇತ್' ಎಂಬ ವಚನದಿಂದ ವಿಧಿಸಿದ ಅಶ್ವದಾನನಿಮಿತ್ತವಾದ ಚತುಷ್ಕಪಾಲ ಪುರೋಡಾಶಯಾಗವು ಲೌಕಿಕವಾದ ಅಶ್ವದಾನಕ್ಕೆ ಪ್ರಾಯಶ್ಚಿತ್ತವೇ ? ವೈದಿಕವಾದ ಅಶ್ವದಾನಕ್ಕೆ ಪ್ರಾಯಶ್ಚಿತ್ತವೇ ? ಇದು ಇಲ್ಲಿನ **ಸಂಶಯ**.

ವಿಶೇಷವಾಗಿ ಏನನ್ನೂ ಹೇಳದೇ ಇರದಿರುವುದರಿಂದ ಎರಡಕ್ಕೂ ಅನ್ವಯಿಸುತ್ತದೆ. ಅಥವಾ 'ನ ಕೇಸರಿಣಃ ದದಾತಿ' ಎಂಬ ಸ್ಮೃತಿವಚನವು ಲೌಕಿಕವಾದ ಅಶ್ವದಾನವನ್ನು ನಿಷೇಧಿಸಿರುವುದರಿಂದ ಲೌಕಿಕದಾನಕ್ಕೇ ಈ ಪ್ರಾಯಶ್ಚಿತ್ತವೂ ಅನ್ವಯಿಸುತ್ತದೆ. ಇದು ಇಲ್ಲಿನ **ಪೂರ್ವಪಕ್ಷ**.

ಲೌಕಿಕವಾದ ಅಶ್ವದಾನದಲ್ಲಿ ಜಲೋದರರೋಗವು ಬರುವುದೆಂದು ಎಲ್ಲಿಯೂ ಹೇಳಿಲ್ಲ, 'ವರುಣೋ ವಾ ಏತಂ ಗೃಹ್ಣಾತಿ' ಎಂಬ ಅರ್ಥವಾದದಲ್ಲಿ ವೈದಿಕಾಶ್ವದಾನದಲ್ಲಿ ಜಲೋದರ ಪ್ರಾಪ್ತಿಯನ್ನು ಹೇಳಲಾಗಿದೆ. ಹೀಗಾಗಿ ಈ ಪ್ರಾಯಶ್ಚಿತ್ತವು ವೈದಿಕಾಶ್ವದಾನದಲ್ಲಿಯೇ ಎಂಬುದು ಇಲ್ಲಿನ **ಸಿದ್ಧಾಂತ**.

2) **ಈ ಪ್ರಾಯಶ್ಚಿತ್ತವು ಯಾರಿಗೆ ?**

[ಜೈ.ಸೂ. 3.4.29.30] ಈ ಪ್ರಾಯಶ್ಚಿತ್ತವು ದಾತೃವಿಗೇ ಅಥವಾ ಪ್ರತಿಗೃಹೀತೃವಿಗೇ ? ಎಂಬುದು **ಸಂಶಯ**.

'ಯಾವತೋಽಶ್ವಾನ್ಪ್ರತಿಗೃಹ್ಣೀಯಾತ್' ಎಂಬುದಾಗಿ ಎಷ್ಟು ಸಂಖ್ಯೆಯ ಅಶ್ವಗಳನ್ನು ಪ್ರತಿಗ್ರಹ ಮಾಡುತ್ತಾನೆಯೋ ಎಂದಿರುವುದರಿಂದ ಈ ಪ್ರಾಯಶ್ಚಿತ್ತವು ಪ್ರತಿಗೃಹೀತೃವಿಗೇ ಸರಿ. ಇದು ಇಲ್ಲಿನ **ಪೂರ್ವಪಕ್ಷ**.

ಉಪಕ್ರಮದಲ್ಲಿ 'ಪ್ರಜಾಪತಿರ್ವರುಣಾಯಾಶ್ವಮನಯತ್, ಸಃ ಸ್ವಾಮ್ ದೇವತಾವಾರ್ಛತ್' ಎಂದಿರುವುದರಿಂದ ಅಲ್ಲಿ ಅಶ್ವದಾನವನ್ನು ಮಾಡಿದ ಪ್ರಜಾಪತಿಗೇ ರೋಗಪ್ರಾಪ್ತಿಯೆಂದು ಹೇಳಿದೆ. ಅಸಂಜಾತವಿರೋಧಿನ್ಯಾಯದಿಂದ ದಾತೃವಿಗೇ ಈ ಪ್ರಾಯಶ್ಚಿತ್ತೇಷ್ಟಿ, ವಿಧಿವಾಕ್ಯದಲ್ಲಿ 'ಪ್ರತಿಗೃಹೀಯಾತ್' ಎಂಬುದನ್ನು 'ಪ್ರತಿಗ್ರಾಹಯೇತ್' ಎಂಬ ಣಿಜಂತರೂಪವನ್ನಾಗಿ ಪರಿಗಣಿಸಬೇಕು. ಇದು ಇಲ್ಲಿನ **ಸಿದ್ಧಾಂತ**.

वेदवारिधिः प. रामानुजाचार्यः



श्रीमते पराङ्कुशार्यमहादेशिकाय नमः । ऋचः सामानि यजूꣳषि । सा हि श्रीरमृता सताम् ।

**पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)**

pivstrust.org ✉: pivstrust@gmail.com



# AB Keith English Translation - ii. 3. 12.

**Prajāpati led the horse to Varuṇa, it[1] went to its own deity, he was afflicted;** he saw this (offering) to Varuṇa on four potsherds, he offered it; then indeed was he set free from Varuṇa's noose. Varuṇa seizes him who accepts the horse. As many horses as he accepts, so many (offerings) to Varuṇa should he offer; verily he has recourse to Varuṇa with his own share; verily he frees him from Varuṇa's noose [1]. (The offerings) are on four potsherds, for the horse has four feet; (verily they serve) for prosperity. He should offer an extra one; whatever (horse) he is going to accept or whatever (horse) he has overlooked, from that noose of Varuṇa is he set free. If he is going to accept another, he should offer in supplement an offering to Sūrya, on one potsherd; verily he makes yonder sun to rise. He goes to the waters as the final bath, Varuṇa is in the waters; verily straightway he appeases Varuṇa. After his return he should offer an oblation to Apām Napāt; the horse has its birthplace in the waters; verily he makes him go to his own birthplace; appeased he attends on him.

Footnotes: [1] **This is not very clear. Sāyaṇa thinks Prajāpati is the subject of the second clause and that 'ārchat' means 'ārtām akarot'.** [and so, Eggeling]. That is hardly possible, but it may be that the subject is the horse and ārchat means 'afflicted'. **Probably, however, it means that the horse went back to Prajāpati as its primal deity and that Varuṇa avenged himself by causing Prajāpati to become dropsical [paryadīryata].** Hillebrandt thinks that Prajāpati appropriates the steed from Varuṇa, but this is impossible syntax.

वेदवारिधिः प. रामानुजाचार्यः